# ekadantagaNeshastotram

# એકદંતગણેશસ્તોત્રમ્

## Document Information

Text title : ekadantagaNesha stotram

File name : ekadantagaNeshastotra.itx

Category : ganesha, stotra

Location : doc_ganesha

Transliterated by : Available at webdunia.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : April 27, 2004

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 22, 2023

*sanskritdocuments.org*

# એકદંતગણેશસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
મદાસુરં સુશાન્તં વૈ દૃષ્ટ્વા વિષ્ણુમુખાઃ સુરાઃ ।
ભૃગ્વાદયશ્ચ મુનય એકદન્તં સમાયયુઃ ॥ ૧॥

પ્રણમ્ય તં પ્રપૂજ્યાદૌ પુનસ્તં નેમુરાદરાત્ ।
તુષ્ટુવુર્હર્ષસંયુક્તા એકદન્તં ગણેશ્વરમ્ ॥ ૨॥

દેવર્ષય ઊચુઃ
સદાત્મરૂપં સકલાદિ-ભૂતમમાયિનં સોઽહમચિન્ત્યબોધમ્ ।
અનાદિ-મધ્યાન્ત-વિહીનમેકં તમેકદન્તં શરણં વ્રજામઃ ॥ ૩॥

અનન્ત-ચિદ્રૂપ-મયં ગણેશં હ્યભેદ-ભેદાદિ-વિહીનમાદ્યમ્ ।
હૃદિ પ્રકાશસ્ય ધરં સ્વધીસ્થં તમેકદન્તં શરણં વ્રજામઃ ॥ ૪॥

વિશ્વાદિભૂતં હૃદિ યોગિનાં વૈ પ્રત્યક્ષરૂપેણ વિભાન્તમેકમ્ ।
સદા નિરાલમ્બ-સમાધિગમ્યં તમેકદન્તં શરણં વ્રજામઃ ॥ ૫॥

સ્વબિમ્બભાવેન વિલાસયુક્તં બિન્દુસ્વરૂપા રચિતા સ્વમાયા ।
તસ્યાં સ્વવીર્યં પ્રદદાતિ યો વૈ તમેકદન્તં શરણં વ્રજામઃ ॥ ૬॥

ત્વદીય-વીર્યેણ સમર્થભૂતા માયા તયા સંરચિતં ચ વિશ્વમ્ ।
નાદાત્મકં હ્યાત્મતયા પ્રતીતં તમેકદન્તં શરણં વ્રજામઃ ॥ ૭॥

ત્વદીય-સત્તાધરમેકદન્તં ગણેશમેકં ત્રયબોધિતારમ્ ।
સેવન્ત આપુસ્તમજં ત્રિસંસ્થાસ્તમેકદન્તં શરણં વ્રજામઃ ॥ ૮॥

તતસ્ત્વયા પ્રેરિત એવ નાદસ્તેનેદમેવં રચિતં જગદ્વૈ ।
આનન્દરૂપં સમભાવસંસ્થં તમેકદન્તં શરણં વ્રજામઃ ॥ ૯॥

તદેવ વિશ્વં કૃપયા તવૈવ સમ્ભૂતમાદ્યં તમસા વિભાતમ્ ।
અનેકરૂપં હ્યજમેકભૂતં તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૦॥

તતસ્ત્વયા પ્રેરિતમેવ તેન સૃષ્ટં સુસૂક્ષ્મં જગદેકસંસ્થમ્ ।
સત્ત્વાત્મકં શ્વેતમનન્તમાદ્યં તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૧॥

તદેવ સ્વપ્નં તપસા ગણેશં સંસિદ્ધિરૂપં વિવિધં વભૂવ ।
સદેકરૂપં કૃપયા તવાઽપિ તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૨॥

સમ્પ્રેરિતં તચ્ચ ત્વયા હૃદિસ્થં તથા સુસૃષ્ટં જગદંશરૂપમ્ ।
તેનૈવ જાગ્રન્મયમપ્રમેયં તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૩॥

જાગ્રત્સ્વરૂપં રજસા વિભાતં વિલોકિતં તત્કૃપયા યદૈવ ।
તદા વિભિન્નં ભવદેકરૂપં તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૪॥

એવં ચ સૃષ્ટ્વા પ્રકૃતિસ્વભાવાત્તદન્તરે ત્વં ચ વિભાસિ નિત્યમ્ ।
બુદ્ધિપ્રદાતા ગણનાથ એકસ્તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૫॥

ત્વદાજ્ઞયા ભાન્તિ ગ્રહાશ્ચ સર્વે નક્ષત્રરૂપાણિ વિભાન્તિ ખે વૈ ।
આધારહીનાનિ ત્વયા ધૃતાનિ તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૬॥

ત્વદાજ્ઞયા સૃષ્ટિકરો વિધાતા ત્વદાજ્ઞયા પાલક એવ વિષ્ણુઃ ।
ત્વદાજ્ઞયા સંહરકો હરોઽપિ તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૭॥

યદાજ્ઞયા ભૂર્જલમધ્યસંસ્થા યદાજ્ઞયાઽપઃ પ્રવહન્તિ નદ્યઃ ।
સીમાં સદા રક્ષતિ વૈ સમુદ્રસ્તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૮॥

યદાજ્ઞયા દેવગણો દિવિસ્થો દદાતિ વૈ કર્મફલાનિ નિત્યમ્ ।
યદાજ્ઞયા શૈલગણોઽચલો વૈ તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૯॥

યદાજ્ઞયા શેષ ઇલાધરો વૈ યદાજ્ઞયા મોહપ્રદશ્ચ કામઃ ।
યદાજ્ઞયા કાલધરોઽર્યમા ચ તમેકદન્તં શરણં વ્રજામઃ ॥ ૨૦॥

યદાજ્ઞયા વાતિ વિભાતિ વાયુર્યદાજ્ઞયાઽગ્નિર્જઠરાદિસંસ્થઃ ।
યદાજ્ઞયા વૈ સચરાઽચરં ચ તમેકદન્તં શરણં વ્રજામઃ ॥ ૨૧॥

સર્વાન્તરે સંસ્થિતમેકગૂઢં યદાજ્ઞયા સર્વમિદં વિભાતિ ।
અનન્તરૂપં હૃદિ બોધકં વૈ તમેકદન્તં શરણં વ્રજામઃ ॥ ૨૨॥

યં યોગિનો યોગબલેન સાધ્યં કુર્વન્તિ તં કઃ સ્તવનેન સ્તૌતિ ।
અતઃ પ્રણામેન સુસિદ્ધિદોઽસ્તુ તમેકદન્તં શરણં વ્રજામઃ ॥ ૨૩॥

ગૃત્સમદ ઉવાચ
એવં સ્તુત્વા ચ પ્રહ્લાદ દેવાઃ સમુનયશ્ચ વૈ ।

તૂષ્ણીં ભાવં પ્રપદ્યૈવ નનૃતુર્હર્ષસંયુતાઃ ॥ ૨૪॥

સ તાનુવાચ પ્રીતાત્મા હ્યેકદન્તઃ સ્તવેન વૈ ।
જગાદ તાન્ મહાભાગાન્ દેવર્ષીન્ ભક્તવત્સલઃ ॥ ૨૫॥

એકદન્ત ઉવાચ
પ્રસન્નોઽસ્મિ ચ સ્તોત્રેણ સુરાઃ સર્ષિગણાઃ કિલ ।
વૃણુધ્વં વરદોઽહં વો દાસ્યામિ મનસીપ્સિતમ્ ॥ ૨૬॥

ભવત્કૃતં મદીયં વૈ સ્તોત્રં પ્રીતિપ્રદં મમ ।
ભવિષ્યતિ ન સન્દેહઃ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૭॥

યં યમિચ્છતિ તં તં વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ।
પુત્ર-પૌત્રાદિકં સર્વં લભતે ધન-ધાન્યકમ્ ॥ ૨૮॥

ગજાશ્વાદિકમત્યન્તં રાજ્યભોગં લભેદ્ ધ્રુવમ્ ।
ભુક્તિં મુક્તિં ચ યોગં વૈ લભતે શાન્તિદાયકમ્ ॥ ૨૯॥

મારણોચ્ચાટનાદીનિ રાજ્યબન્ધાદિકં ચ યત્ ।
પઠતાં શૃણ્વતાં નૃણાં ભવેચ્ચ બન્ધહીનતા ॥ ૩૦॥

એકવિંશતિવારં ચ શ્લોકાંશ્ચૈવૈકવિંશતિમ્ ।
પઠતે નિત્યમેવં ચ દિનાનિ ત્વેકવિંશતિમ્ ॥ ૩૧॥

ન તસ્ય દુર્લભં કિંચિત્ ત્રિષુ લોકેષુ વૈ ભવેત્ ।
અસાધ્યં સાધયેન્ મર્ત્યઃ સર્વત્ર વિજયી ભવેત્ ॥ ૩૨॥

નિત્યં યઃ પઠતે સ્તોત્રં બ્રહ્મભૂતઃ સ વૈ નરઃ ।
તસ્ય દર્શનતઃ સર્વે દેવાઃ પૂતા ભવન્તિ વૈ ॥ ૩૩॥

એવં તસ્ય વચઃ શ્રુત્વા પ્રહૃષ્ટા દેવતર્ષયઃ ।
ઊચુઃ કરપુટાઃ સર્વે ભક્તિયુક્તા ગજાનનમ્ ॥ ૩૪॥

॥ ઇતિ શ્રી એકદન્તસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

*ekadantagaNeshastotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*